# Naradakritam Surya Stotram 24

# नारदकृतं सूर्यस्तोत्रम् २४

## Document Information

Text title : Naradakritam Surya Stotram 24

File name : nAradakRRitaMsUryastotram24.itx

Category : navagraha, skandapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 305/18-21||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 6, 2025

*sanskritdocuments.org*

# नारदकृतं सूर्यस्तोत्रम् २४

कृष्णाजिनपरिच्छिन्ने ह्युपविष्टो वरासने ।
ऋषितोयातटे रम्ये प्रतिष्ठाप्य महामुनिः ॥ १६॥

सूर्यस्य प्रतिमां रम्यां सर्वदारिद्र्यनाशिनीम् ।
तुष्टाव विविधैः स्तोत्रैरादित्यं तिमिरापहम् ॥ १७॥

नमस्ते ऋक्स्वरूपाय साम्नां धामग ते नमः ।
ज्ञानैकरूपदेहाय निर्धूततमसे नमः ॥ १८॥

शुद्धज्योतिःस्वरूपाय निर्मूर्तायामलात्मने ।
वरिष्ठाय वरेण्याय सर्वस्मै परमात्मने ॥ १९॥

नमोऽखिलजगद्व्यापिस्वरूपानन्दमूर्तये ।
सर्वकारणभूताय निष्ठायै ज्ञानचेतसाम् ॥ २०॥

नमः सर्वस्वरूपाय प्रकाशालक्ष्यरूपिणे ।
भास्कराय नमस्तुभ्यं तथा दिनकृते नमः ॥ २१॥

ईश्वर उवाच ।
एवं संस्तुवतस्तस्य पुरतस्तस्य चेतसा ।
प्रादुर्बभूव देवेशि जगच्चक्षुः सनातनः ॥ २२

इति श्रीस्कन्दपुराणे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये
त्र्यधिकत्रिशततमाध्यायान्तर्गतं नारदकृतं सूर्यस्तोत्रं
समाप्तम् ।

स्कन्दपुराण । प्रभासखण्ड । अध्याय ३०५/१८-२१॥

skandapurANa . prabhAsakhaNDa . adhyAya 305/18-21..

Proofread by PSA Easwaran

*Naradakritam Surya Stotram 24*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*